National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(62): 137-139
© 2025 NJHSR
www.sanskritarticle.com

**ममता महान्त**
शोधच्छात्रा, अलङ्कारविभागः,
कर्नाटक-संस्कृत-विश्वविद्यालयः,
बेङ्गलूरु

**Correspondence:**
**ममता महान्त**
शोधच्छात्रा, अलङ्कारविभागः,
कर्नाटक-संस्कृत-विश्वविद्यालयः,
बेङ्गलूरु

# आचार्य श्रीवनमालिविश्वालस्य काव्येषु सांस्कृतिक परिशीलनम्

**ममता महान्त**

सम् उपसर्गपूर्वकात् कृ धातोः भावार्थे क्तिन् प्रत्यये कृते सति **सम् परिभ्यां करतौ भूषणे**[1] इति सूत्रेण संस्कृतिशब्दस्य निष्पत्तिर्भवति । अर्थात् जीवनस्य संस्करणं परिष्करणं नाम संस्कृतिः इति शास्त्रकाराः निगदन्ति। मनुष्यस्य जन्मात् आरभ्य मरणपर्यन्तं प्रचलितानां रीतिः नीतिश्च संस्कृतिशब्देन अभिधीयते। परन्तु संस्कृतिशब्दस्य प्रयोगः वैदिकमन्त्रेष्वपि दरीदृश्यते । तद्यथा –

**आत्मसंस्कृतिर्वा व शिल्पानि**
**छन्दोमयं वा एतैर्यजमान आत्मानं संस्कुरुते ।।**[2]

विश्वस्य प्राचीनतमा संस्कृतिः भवति भारतीया संस्कृतिः इति। विश्वहितसम्पादनात् लोकपथप्रकाशनाद् विश्वस्य आवरणत्वाच्च विश्ववारा प्रथमा संस्कृतिरियम् यजुर्वेदे निर्दिश्यते सा प्रथमा **संस्कृतिर्विश्ववारा।**[3] **इति ।**

विश्वालमहोदयस्य काव्येषुऽपि नैकानि सांस्कृतिकतथ्यानि सन्निहिताः सन्ति । आदौ श्रीजगन्नाथसंस्कृति विषये पर्यालोचयामि । यथा-

➢**श्रीजगन्नाथसंस्कृतिः -**

समग्रविश्वे विद्यमानेषु संस्कृतिषु श्रीजगन्नाथसंस्कृतिः अखिलब्रह्माण्डस्य प्राचीनतमा संस्कृतिः अस्ति या सनातनधर्मधारिता अस्ति।एषा संस्कृतिः न केवलं भारतदेशस्य अपि तु समग्रविश्वस्य मुकुटायमानाऽस्ति। एतस्याः संस्कृतेः शासकेश्वरः भवन्तिसाक्षात् भगवान् जगदीश्वरःश्रीजगन्नाथः। श्रीजगन्नाथसंस्कृतेः संस्कृतिः परम्परा च महाप्रभुश्रीजगन्नाथस्य संस्कारेषुउत्सवेषु च आधारिताः सन्ति। अतः उत्कलप्रदेशस्य श्रीजगन्नाथसंस्कृतिः भवति अनन्या अनुपमा च संस्कृतिः।

अनादिकालात् परंब्रह्मश्रीजगन्नाथः दारुदेवतारूपेण महोदधेस्तीरे पुण्यनीलाचलक्षेत्रे पुरीनगरे श्रीमन्दिरे प्रपूज्यते। रहस्यमयस्य पुरुषोत्तमस्य श्रीजगन्नाथदेवस्य पूजापरम्परादिकमपि सर्वथा रहस्यमयं भवति। तदर्थं शास्त्रे विद्यते **-सर्वरहस्यं पुरुषोत्तमस्य देवो न जानाति कुतः मनुष्यः।**

यथा श्रीगुण्डिचोत्सवे जगन्नाथः वलभद्रः, देवीसुभद्रा तथा सुदर्शनः 'पहण्डि'- द्वारा मन्दिराद् बहिः आगत्य रथे उपवेशनकुर्वन्ति। तत्पश्चात् उत्कलस्य गजपति- महाराजः सुवर्ण-सम्मार्जन्या द्वारा रथानां परिष्करणं करोति। एषः विधिः "छेरापहरा-"विधिरिति नाम्ना उत्कले प्रसिद्धिरस्ति। मर्त्यपुरस्य चलन्ती विष्णुप्रतिमेति उपाधिना ख्यातः गजपतिमहाराजः सुवर्णसम्मार्जन्या रथस्य सम्मार्जनमेतदर्थं करोति यदनेन राजा आत्मानं जगन्नाथस्य सेवकरूपेण प्रस्तोतुमिच्छति। एषा संस्कृति कुत्रापि नोपलभ्यते। काव्ये यथा-

**गुण्डिचाऽहं मातृस्वसा श्रीजगन्नाथस्य**
**जननीवदात्मीयता मयि सदा तस्य।**
**न देवकी जन्मदात्री न चास्मि यशोदा**
**गुण्डिचाऽहं मयि तस्यास्ति महती श्रद्धा।**
**स ममास्ति अहमपि तस्य निःसन्देहं**
**प्रतिवर्षं जगन्नाथ ! आयाति मे गृहम् ।**

**प्रियं तस्य 'पोड-पिष्टं' तण्डुल-निर्मितं**
**खादयिष्याम्यहं दुग्धशर्करासहितम् ।**
**नवचुल्ल्यां नव-पात्रे अहं नववस्त्रा**
**पिष्टं निर्मापयिष्ये आयातु रथयात्रा।**
**नव-तण्डुल-चूर्णके गुड-नारिकेलं**
**न रोचते तस्मै यदा श्रीमन्दिरभोगः**
**दत्वा निर्मापयिष्येऽहं पिष्टं स्वादुकरम्।**
**ज्वरात् परं स्मरति मां पुत्रो जगन्नाथः।[4]**

श्रीजगन्नाथसंस्कृतौ सालवेगनामधेयः एकः यवनः श्रीजगन्नाथस्य अनन्यभक्तः। केनापिप्रकारेण सह श्रीजगन्नाथस्य कृपामवाप्य निरोगः सञ्जातः

तद् सर्वे जानन्ति। सालवेगः श्रीजगन्नाथस्योपरि अनेका भक्तिपूर्णाकविता विरचिता। इदानीमपि समग्रोत्कले सालवेगस्य भजनस्य प्राधान्यं दरीदृश्यते। अत्र एवं ज्ञायते यत्र जाति-धर्म-वर्ण-निर्विशेषे जगन्नाथः भक्ताधिनः इति।

श्रीजगन्नाथसंस्कृतौ नैके तथ्याः उपलभ्यन्ते। पुनः एकस्योदाहरणं उपस्थापयामि यत् जगन्नाथसंस्कृतिः शवरसंस्कृति इति। यत्र विश्वावसूवंशजाः दइतापतिसेवकाः अनवसर समये महाप्रभोः सेवादिकं कुर्वन्ति ।

**वामदेवसंसहितायां विद्यते यत्र –**
**विश्वावसुकुलोद्भुता येऽपीह धर्मकारीणः।**
**तेऽपि सर्वेचेश्वरस्य कर्मकुर्वन्ति यत्नतः ।।[5]**

तदनु रथयात्रायामपि दइतापति सम्प्रदायस्य प्राधान्यं विद्यते । भारतवर्षे सर्वत्र देवतानां सेवा, पूजा च ब्राह्मणैः विधीयेते। परन्तु जगन्नाथक्षेत्रे ब्राह्मणैः सह शूद्राःआदिवासिनोऽपि जगन्नाथस्य सेवायाः अवसरं लभन्ते। अस्मादपि तथ्यात् जगन्नाथसंस्कृतेः निर्विशेष-जाति-धर्म-वादत्वं सिद्ध्यत्येव। तदर्थं कविः उदयानाचार्यः वदति –

**यं शैवा समुपासते शिव इति ब्रह्मेति वेदान्तिनो।**
**बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः।।**
**अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः।**
**सोऽयं वो विदधातु बाञ्छितफलं त्रैलाक्यनाथो हरिः।।**

महाप्रभु श्रीजगन्नाथः ताम्बुलप्रियः। तदर्थं प्रायतः उत्कले ताम्बुलस्य प्राध्यान्यं विद्यते। श्रीजगन्नाथस्य ताम्बुलभक्षणविषये एका किम्बदन्ति प्रथितास्ति ।अत्रैव न उपस्थापयामि, परन्तु सहृदयानां कृते केवलं सूचना प्रदत्ता । उत्कले ताम्बुलविषये या उक्ति विद्यते सा उक्ति कविः कविता माध्यमेन वर्णयति। यथा –

**ताम्बूलप्रिय हे नाथ ! खाद ताम्बूलम्**
**आनीतं वास-ताम्बूलं मनोऽनुकूलम् ।**
**पिपिलि-ताम्बूल-कोषे सद्यस्ताम्बूलं**
**गृहीत्वाऽगताऽहं प्रभो ! तव समीपम्।**
**ताम्बूल-भक्षणे भवेद्रक्तावधरौ,**
**बिम्बफलनिभौ स्यातां किं मनोहरौ।**
**वनमालिपुरपूगः लवङ्गपुष्पं**
**'इलाइच्या 'प्रस्तुतं च ताम्बूलमिदम् ...... इत्यादि ।[6]**

एवमेव श्रीजग्नातसंस्कृतिः विश्वे राराज्यन्ते । विश्वालमहोदयः श्रीजगन्नाथस्य परम भक्तः। तदर्थं दारुब्रह्म एवं श्रीजगन्नाथचरित इति ग्रन्थद्वये श्रीजगन्नाथस्य तत्वानि विलसन्ति।

**➢वसुधैवकुटुम्वकम् –**

जगतस्य स्त्रष्टा ईश्वरः। वयं सर्वे तस्य अमृतस्य पुत्राः। परन्तु विश्वस्य सर्वेषु भागेषु स्थिताः जनाः रूप वर्ण-भाषा भेदान् अभिन्ना इति । अद्य तु विज्ञानस्य प्रभावेण भारत स्थितः जनः विदेशेषु स्थितानां जनानां समाचारं प्रतिदिनं प्राप्तुं प्रभवति। एतस्य सहयोगेन कुत्रचिदपि घटितां घटनां क्षणादेव वयं ज्ञातुं समर्थाः भवामः। अतः उपर्युक्तस्थितौ विश्वबन्धुत्वस्य भावनायाः महती आवश्यकता अस्ति।

परिवारे माता यथा सर्वेषु पुत्रेषु समानभावेन स्निह्यति तथैव धरित्रीमाता सर्वेषां कृते समानभावं प्रदर्शयति । सर्वविश्वं स्वकुटुम्बं इति विचिन्त्य सा कार्यं करोति। ऋतुपर्णाकाव्ये कविः वर्षाऋतु विषये वर्णयति । कथं वर्षाऋतु समग्रविश्वे समानभावेन अनुभवति तदेव विद्यते। यथा-

**ऋषोऽस्तु**
**आमेरिका वास्तु**
**भारतमथवा चीनम्,**
**अस्तु पुनरस्मत्प्रतिवेशि पाकिस्तानम्**
**सर्वमत्र धरायाः सन्तानम्,**
**जीवामोऽत्र ईश्वरीय-प्रेम्णा**
**'युद्धं देहि' आह्वानस्य**
**नास्ति प्रयोजनम् ।**
**मानवताभित्तौ प्रतिष्ठितम्**
**भवत्वत्र किञ्चित् नवयुगम्,**
**तद् युगं स्यात् शान्तियुगम्।**
**मैत्रीयुगम् ।**
**उत पुनरीश्वरीयं युगम् ।**
**अतः परं पृथिव्यां नो**
**न भवतु शत्रु-मित्र-भेदः,**
**सर्वत्रात्र प्रसरतु**
**'वसुधैव कुटुम्बकम्'-वादः ।[7]**

**➢विश्वभातृत्ववादः -**

संस्कृतिः यदा विविधरूपा अस्ति, तदा अपि सा सर्वेभ्यः मानवेषु एका सादृश्यभावनां निर्माति। गीतासु, वेदेषु, उपनिषद्सु च यः आत्मवादः, समत्वभावः च प्रतिपाद्यते, सः समग्रं मानवसमाजं एका सूत्रे बध्नाति। अयं विश्वभ्रातृत्ववादः केवलं एकं आदर्शं न, अपि तु व्यवहार्यं जीवनपद्धतिं बोधयति।

आदौ यदि यदि आलोचयामः तर्हि श्रीजगन्नाथसंसेकृतौ विश्वभातृत्ववादः परिलक्षते। किमर्थं इत्युक्ते वयं सर्वे जानीमः केनापि प्रकारेण रथोत्सवे महाप्रभुक्षीजगन्नाथः पादहुण्डनं(पहण्डि) कृत्वा श्रीमन्दिरात् आगत्य रथे उपविश्य ज्योष्ठभ्रातः वलदेवः भगिनीसुभद्रा सह गुण्डिचा मन्दिरंप्रति गच्छन्ति। तस्मिन् एव समये सर्वे सम्प्रदायाः रथं समाकर्षन्ति । काव्ये कविः वर्णयति यथा-

**हिन्दुस्त्रीष्टास्त्विह सह शिखैर्मुस्लिमैर्जेनबौद्ध :**
**भक्ताः सन्त्यस्य च बहुविधाः वैष्णवाः शैवशाक्ताः।**
**आर्यानार्यैः सह च शवरैर्वाह्मणाः पामराश्च**
**संजप्येमं भूवमथ जगन्नायमेकं तरन्ति।।**[8]

श्रीजगन्नाथस्य प्रसादः आचण्डालात् ब्राह्मणपर्यन्तं सर्वे सहैव भोक्तुं प्रभवन्ति । विश्वभातृत्ववादस्य चरम निदर्शन भवति श्री जगन्नाथ संस्कृति। श्रीजगन्नाथः जाति वर्ण धर्मरूपस्य प्रतीकः इति। जगन्नाथसंस्कृतौ जातेः धर्मस्य वा न किमपि महत्त्वम वर्त्तते। मनुष्यतैव एकजातिः। मानवातैव एकधर्मः। जगन्नाथसंस्कृतौ न केवलं चतुर्णां वर्णानां समभावत्वं इष्यते अपि तु उच्च-नीच्च धनी-दरिद्रस्य भेदभावः किमपि नास्ति । सर्वेषु भक्तेषु समानेव दृष्टिः यद् सर्वे भक्तवत्सलाः इति । एवं प्रकारेण अनेके कथा श्रीजगन्नाथसंस्कृतौ विहिता । पुनः ऋतुपर्णाकाव्ये विद्यते यथा-

**स्थान-स्थाने जातिजनितः भेदः।**
**भाषाखड्गेनैक्यं देशस्य छिन्न**
**नदीबन्धैः कृतं जलवण्टनम् ।**
**प्रतिष्ठायै त्यक्ता स्वमातृभाषा**
**न जानीमः काऽस्ति नो राष्ट्रभाषा।**
**पूर्वजानां स्वदेशप्रीतिकथा**
**वीरताऽपि काचित् पुराणगाथा**
**कन्याकुमारीतः कश्मीरं यावत्**
**तिष्ठन्तु भारते सर्वे भ्रातृवत् ।**
**भ्रातरः हिन्दवः, मुसलिमाः,**
**सिखाः सर्वेषां जननी भारतमाता ।**
**ऐक्ये प्रस्थापिते लप्स्यामः यशः**
**अस्मज्जयगीति गास्यति विश्वम्।**[9]

एवं प्रकारेण विश्वालमहोदयस्य काव्येषु संस्कत्यानुगुणं पूजा, परम्परा तथा महाकुम्भमेलादि सांस्कृतिकविषयाः राराज्यन्ते ।

**सन्दर्भग्रन्थसूची –**


1. अमरकोषः -पण्डितशिवदत्तदधिमथः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २००७
2. संस्कृतवाङ्गय का बृहद् इतिहास - बलदेव उपाध्याय, उत्तरप्रदेश संस्कृत संस्थान, 1977
3. सङ्गमेनाभिरामा (1996), पद्मजाप्रकाशनम्, 57, वसन्तविहार, झूसी, इलाहाबाद-211019
4. ऋतुपर्णा (1999) पद्मजाप्रकाशनम्, 57, वसन्तविहार, झूसी, इलाहाबाद-211019
5. दारुब्रह्म (2001) पद्मजाप्रकाशनम्, 57, वसन्तविहार, झूसी, इलाहाबाद- 211019
6. व्यथा (1997) पद्मजाप्रकाशनम्, 57, वसन्तविहार, झूसी, इलाहाबाद- 211019
7. यात्रा (2002) पद्मजाप्रकाशनम्, 57, वसन्तविहार, झूसी, इलाहाबाद- 211019


**संदर्भ :-**

[1]सि. कौ. - 6-1-137
[2]ऐत.उ.
[3]यजु. -7-14
[4]दारुब्रह्म-पृ30
[5]वा.स.15-12
[6]दारुब्रह्म-52
[7]ऋतुपर्णा 14
[8]सङ्गमे –पृ-51
[9]ऋतुपर्णा/57